# संस्कृत-वार्ता:

दिनाङ्क : 13/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- बिहारराज्ये विधानसभा-निर्वाचनस्य मतगणना श्वः प्रातः अष्टवादनात् समारप्स्यते,अनेन प्रत्याशिनां निर्वाचनभाग्यं निर्धारितं भविष्यति।
- राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य बोत्सवाना-नगरे भारतीयसमुदायस्य सदस्यान् सम्बोधितवती। राष्ट्रपतिः दिल्ल्यां सद्यः एव आतंकवाद-आक्रमणे मृतकानां परिवाराय मित्रेभ्यश्च शोकं प्रकटितवती।
- प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् निर्यातकाणां ऋण-गारण्टी-योजना वैश्विक-स्पर्धां वर्धयित्वा व्यापार-सञ्चालनं सरलीकरिष्यति। सामाजिक-सञ्जालीय-सन्देशे श्रीमोदिना केन्द्रीयमन्त्रिमण्डलस्य निर्णयानां प्रशंसा कृता ।
- पाकिस्तानस्य अधिकारिभिः क्वेटा-चमनस्थलैः सह बलूचिस्तानस्य कतिचित्-जनपदेषु दिनत्रयं यावत् दूरभाष-अन्तर्जालीयसेवाः निलम्बिताः।
- भारतीय-लक्ष्यभेदकैः ढाका-नगरे आयोजितायां चतुर्विंशतितमायाम् एशियाई-लक्ष्यभेद-प्रतिस्पर्धायां उत्कृष्ट-प्रदर्शनेन सह द्वे स्वर्ण-पदके एकं रजत-पदकम् च विजितम्।

---------------------------------------------------

<u>बिहारराज्यस्य विधानसभा</u>

बिहारराज्ये विधानसभा-निर्वाचनस्य मतगणना श्वः प्रातः अष्टवादनात् समारप्स्यते। बिहारराज्यस्य अष्टत्रिंशत्-जनपदानां षट्चत्वारिंशत् मतगणनाकेन्द्रेषु मतानां गणनं भविष्यति। विधानसभायाः त्रिश्चत्वारिंशदधिक-द्विशतं निर्वाचनक्षेत्राणां कृते द्वयोः चरणयोः निर्वाचनम् अभवत्। इलेक्ट्रॉनिक्-मतदान-यन्त्रेषु यत्र सर्वेषां षोडशाधिकषड्शतोत्तर-द्विसहस्त्र प्रत्याशिनां निर्वाचनभाग्यं निहितमस्ति , तानि यन्त्राणि कठोर-सुरक्षायाः मध्ये सशक्त-प्रकोष्ठेषु स्थापितानि सन्ति । आकाशवाण्या सह वार्तालापं कुर्वन् बिहारस्य मुख्य-निर्वाचनाधिकारी विनोदसिंह-गुञ्जियालः अवदत् यत् मतदाने उपयोजितानि ई.वी.एम्.-यन्त्राणि, वी.वी.पी.ए.टी.-यन्त्राणि च

त्रिस्तरीय-सुरक्षा-व्यवस्थायाः अन्तर्गतं सशक्त-कक्षेषु स्थापितानि सन्ति । सर्वेषु गणनाकेन्द्रेषु विस्तृत-सुरक्षाव्यवस्था प्रकल्पितास्ति। समुचित-सुरक्षायै केन्द्रीय-सशस्त्र-आरक्षक-बलानां राज्य-आरक्षक-बलानां च नियोजनमपि कृतम् अस्ति। श्री-गुञ्जियालः प्रोक्तवान् यत् विधानसभाक्षेत्रेषु निर्वाचनार्थं नियुक्ताः पर्यवेक्षकाः अपि गणना-प्रक्रियायाः निरीक्षणार्थं गणनाकेन्द्रेषु उपस्थिताः भविष्यन्ति इति।

-----------------------------------------------

राष्ट्रपति-संबोधनम्

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य बोत्सवाना-नगरे भारतीयसमुदायस्य सदस्यान् सम्बोधितवती। राष्ट्रपतिः दिल्ल्यां सद्यः एव आतंकवाद-आक्रमणे मृतकानां परिवाराय मित्रेभ्यश्च शोकं प्रकटितवती। अत्रावसरे आक्रमणे मृत्युमुपगतानां स्मृतौ एकनिमिषं मौनं अपि आचरितम्। सा प्रोक्तवती यत् भारतीय-प्रवासिनः द्वयोः देशयोः मध्ये मित्रतायाः जीवन्त-सेतवः सन्ति सहैव बोत्सवाना-देशे दश-सहस्र-भारतीयानां समुदायस्य देशस्य आर्थिकवृद्धये तेषां योगदानस्य प्रशंसाम् अकरोत्। राष्ट्रपतिः अवदत् यत् भारतं सप्तचत्वारिंशत्यधिक-द्विसहस्रतमवर्षपर्यन्तं विकसितभारतं भवितुं प्रयत्नशीलः अस्ति तथा च प्रवासिनः अपि अस्याः विकासयात्रायाः अभिन्नभागाः सन्ति। सा अवदत् यत् तेषां उपलब्धयः भारतस्य गौरवः अस्ति, तेषां साफल्येन च भारतस्य गौरवः वर्धते। सा भारत-बोत्सवाना-सम्बन्धेषु योगदानं अनुवर्तयितुं समुदायं प्रार्थयत्

-----------------------------------------------

प्रधानमन्त्री-मन्त्रिमण्डलम्

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् निर्यातकाणां ऋण-गारण्टी-योजना वैश्विक-स्पर्धां वर्धयित्वा व्यापार-सञ्चालनं सरलीकरिष्यति। सामाजिक-सञ्चालीय-सन्देशे श्रीमोदिना केन्द्रीयमन्त्रिमण्डलस्य निर्णयानां प्रशंसा कृता । तेन प्रोक्तं यत् निर्यातप्रवर्धन-अभियानं तावत् निर्यातस्पर्धात्मकतां समीकरिष्यति , एम्. एस्. एम्. ई. इत्येतत् प्रथमतया निर्यातकर्तृणां, श्रमप्रधानक्षेत्राणां च साहाय्यं करिष्यतीति । श्रीमोदी प्रोक्तवान् यत् ईपीएम प्रमुखान् हितधारकान् एकीकृत्य तादृशस्य तन्त्रस्य निर्माणं करोति यत्तु परिणामाधारितं प्रभावयुतञ्च भवेत् । प्रधानमन्त्री अग्रे अकथयत् यत् केन्द्रीयमन्त्रिमण्डलस्य महत्त्वपूर्णानां खनिजानां मुख्य-

मानानां युक्तियुक्त-निर्णयेन स्थिरता, स्वावलम्बनम् च प्रवर्धयिष्यते इति। तेन प्रोदीरितं यत् अनेन पदक्रमेण आपूर्तिशृङ्खलाः सुदृढीभविष्यन्ति सहैव नूतन-वृत्यवसराश्च निर्मिताः भविष्यन्ति।

---------------------------------------------------

## प्रधानमन्त्री-कोयम्बटूरयात्रा

प्रधानमन्त्री नरेन्द्रमोदी नवम्बर-मासस्य एकोनविंशे दिनाङ्के तमिलनाडुराज्यस्य कोयंबटूर-नगरस्य यात्रायै गमिष्यति। अत्रावसरे सः तमिलनाडुराज्यस्य कृषक-सङ्घैः आयोजिते दक्षिण-भारत-प्राकृतिक-कृषि-शिखर-सम्मेलनं सम्बोधयिष्यति। प्रधानमन्त्री दक्षिण-राज्येभ्यः आगतैः जैविक-कृषि-विशेषज्ञैः पञ्चाशत् वैज्ञानिकैः सह अपि संवादं साधयिष्यति। अस्मिन् शिखर-सम्मेलने व्यापक-प्राकृतिक-कृषि-कार्याय नीतयः निर्मास्यन्ते। अवसरेऽस्मिन् त्रिशत-पण्यकेन्द्रैः संवलिता प्रदर्शनी, प्रख्यात-वैज्ञानिकानां नीति-निर्मातृणां च संवाद-सत्राणि, सजव-प्रदर्शनानि, युवकानां महिलानां च सहभागिताश्च अस्य आयोजनस्य केन्द्रबिन्दवः भविष्यन्ति। कार्यक्रमस्तावत् भारतीय-प्राकृतिक-कृषि-धान्यं सहैव परम्परा-कृषि-विकास-योजना इत्यादिभिः राष्ट्रियोपक्रमैः सञ्चाल्यते।

---------------------------------------------------

## राष्ट्रपति-बोत्सवाना

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य चीता-परियोजनायाः अन्तर्गतं भारते स्थानान्तरणार्थं बोत्स्वाना-देशेन चित्र-व्याघ्राणां प्रतीकात्मक-हस्तान्तरणम् अपशयत्। बोत्सवाना-देशस्य राष्ट्रपतिः डूमा बोको इत्येषः अपि अस्मिन् कार्यक्रमे उपस्थितः आसीत्। गृहीताः व्याघ्राः मूलरुपेण घांजी-प्रदेशस्य आसन्, ये भारत-बोत्सवाना-देशयोः विशेषज्ञैः सहकार्येण मोकोलोडी-अभ्यारण्ये स्थिते संगरोध-केन्द्रे विमोचिताः । बोत्सवाना-देशः भारते व्याघ्र-जनसङ्ख्यायाः पुनरुत्थानाय अष्टव्याघ्राणां दानं करिष्यति। व्याघ्र-परियोजना एका अद्वितीयोपक्रमः अस्ति यस्योद्देश्यं व्याघ्राणां दशकेभ्यः विलुप्ततायाः अनन्तरं पुनः भारतं प्रति आनयनम् इत्यस्ति। द्वाविंशत्यधिक-द्विसहस्रतमस्य सितंबर-मासे नामीबिया-देशात् अष्ट व्याघ्राः कुनो-राष्ट्रिय-उद्याने

स्थानान्तरिताः। एतावता भारतं प्रति प्रेषिताः व्याघ्राः, तेषां नूतनपरिवेशे सम्यक्प्रकारेण सम्पृक्ताः सन्ति।

--------------------------------------------------

<u>बलूचिस्तान</u>

पाकिस्तानस्य अधिकारिभिः क्वेटा-चमनस्थलैः सह बलूचिस्तानस्य कतिचित्-जनपदेषु दिनत्रयं यावत् दूरभाष-अन्तर्जालीयसेवाः निलम्बिताः । बलूचिस्तानस्य निवासिनां सञ्चारः, व्यावसायिक-क्रियाकलापाः, दैनन्दिनजीवनं च बाधितम् अभवत्। निवासिनः अकथयन् यत् दूरभाष-अन्तर्जालीयसेवानां स्थगनेन सम्प्रेषणं, अन्यानि आवश्यकानि दैनन्दिनकार्याणि च बाधितानि ।

--------------------------------------------------

<u>भारत-ऋतु-विभागः</u>

भारत-ऋतु-विभागेन अद्य केरलमाहयोः पृथक्-स्थानेषु अतिवृष्टिः भविष्यति इति पूर्वानुमानितम् । छत्तीसगढ-राज्ये, पूर्वराजस्थाने, मध्यप्रदेशे च तीव्र-शैत्यतरङ्गस्य स्थितिः भविष्यति इत्यपि पूर्वानुमानं प्रख्यापितम् । अत्रान्तरे दिल्ली-सीम्नः क्षेत्रेषु वायुः 'गम्भीर' इति वर्गे एव आसीत्। केन्द्रीय-प्रदूषण-नियन्त्रण-मण्डलस्य अनुसारं अद्य अपराह्ने एकवादने अस्य प्रदेशस्य वायु-गुणवत्ता-सूचकाङ्कः त्र्यधिक-चतुर्शतं इति समङ्कितः ।

--------------------------------------------------

<u>देहली-मेट्रो</u>

देहली-मेट्रो-रेल-निगमेन कथितं यत् सुरक्षाकारणात् लाल-किला-मेट्रोस्थानकं अग्रिमसूचनापर्यन्तं पिहितं भविष्यति । सामाजिक-सञ्जालीय-सन्देशे संसूचितं यत् अन्यानि सर्वाणि केन्द्राणि सामान्यरूपेण कार्यं कुर्वन्ति इति। सोमवासरे दिल्ली-नगरस्य लाल किलायाः समीपे कार-यानस्य विस्फोटनेन लाल-किला-मेट्रोस्थानकं पिहितम् अभवत् ।

-------------------------------------------------

## लक्ष्यभेद-प्रतिस्पर्धा

भारतीय-लक्ष्यभेदकैः ढाका-नगरे आयोजितायां चतुर्विंशतितमायाम् एशियाई-लक्ष्यभेद-प्रतिस्पर्धायां उत्कृष्ट-प्रदर्शनेन सह द्वे स्वर्ण-पदके एकं रजत-पदकम् च विजितम्। भारतीय-लक्ष्यभेद-सङ्घस्य आधिकारिक-ट्विट्टर्-माध्यमेन प्रदत्त-सूचनानुसारम् दीपशिखा, ज्योति-सुरेखा-वेन्नम, पृथिका-प्रदीप च इत्येतासां कम्पाउण्ड्-महिला-दलेन एकस्मिन् रोमहर्षके अन्त्यचक्रे कोरिया-देशः पराजित्य स्वर्ण-पदकं विजितम्।

।। इति वार्ताः ।।